# Sarvekrita Shri Ganesha Stuti

# સર્વેકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Sarvekrita Shri Ganesha Stuti 1

File name : gaNeshastutiHsarvekRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 91 | 1.91 44-51||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# સર્વેકૃતા શ્રીગણેશસ્તુતિઃ

સર્વે ઊચુઃ ।
યતોઽનન્તશક્તેરનન્તાશ્ચ જીવા યતો નિર્ગુણાદપ્રમેયાદ્ ગુણાસ્તે ।
યતો ભાતિ સર્વં ત્રિધા ભેદભિન્નં સદા તં ગણેશં નમામો ભજામઃ ॥ ૪૪॥

યતશ્ચાવિરાસીજ્જગત્ સર્વવેત્તુસ્તથાઽબ્જાસનો વિશ્વગો વિશ્વગોપ્તા ।
તથેન્દ્રાદયો દૈત્યસઙ્ઘા મનુષ્યાઃ સદા તં ગણેશં નમામો ભજામઃ ॥ ૪૫॥

યતો વહ્નિભાનૂ ભવો ભૂર્જલં ચયતઃ સાગરાશ્ચન્દ્રમા વ્યોમ વાયુઃ ।
યતઃ સ્થાવરા જઙ્ગમા વૃક્ષસઙ્ઘાઃ સદા તં ગણેશં નમામો ભજામઃ ॥ ૪૬॥

યતો દાનવાઃ કિન્નરા યક્ષસઙ્ઘા યતશ્ચારણા વારણાઃ શ્વાપદાશ્ચ ।
યતઃ પક્ષિકીટા યતો વીરુધશ્ચ સદા તં ગણેશં નમામો ભજામઃ ॥ ૪૭॥

યતો બુદ્ધિરજ્ઞાનનાશો મુમુક્ષોર્યતઃ સમ્પદો ભક્તસન્તોષિકાઃ સ્યુઃ ।
યતો વિઘ્નનાશો યતઃ કાર્યસિદ્ધિઃ સદા તં ગણેશં નમામો ભજામઃ ॥ ૪૮॥

યતઃ પુત્રસમ્પદ્ યતો વાઞ્છિતાર્થો યતો ભક્તિવિઘ્નાસ્તથાઽનેકરૂપાઃ ।
યતઃ શોકમોહૌ યતઃ કામ એવ સદા તં ગણેશં નમામો ભજામઃ ॥ ૪૯॥

યતોઽનન્તશક્તિઃ સ શેષો બભૂવ ધરાધારણેઽનેકરૂપે ચ શક્તઃ ।
યતોઽનેકધા સ્વર્ગલોકા હિ નાના સદા તં ગણેશં નમામો ભજામઃ ॥ ૫૦॥

યતો વેદવાચો વિકુણ્ઠા મનોભિઃ સદા નેતિ નેતીતિ તા યં ગૃણન્તિ ।
પરબ્રહ્મરૂપં ચિદાનન્દભૂતં સદા તં ગણેશં નમામો ભજામઃ ॥ ૫૧॥

ઇતિ સર્વેકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૯૧ । ૧.૯૧ ૪૪-૫૧॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 91 . 1.91 44-51..

Proofread by Preeti Bhandare

*Sarvekrita Shri Ganesha Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*